# श्रीसूक्तम्

हिरण्यवर्णां हरिणीँ सुवर्णरजतस्त्रजाम् । चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् । यस्यां हिरण्यं विंदेयं गामस्तं पुरुषानहम् ॥ अस्वपूर्वां रथमध्यां हस्तिनाद प्रबोधिनीम् । श्रियं देवी मुपह्वये श्रीर्मादेवी जुषताम् ॥ कां सोस्मितां हिरण्यप्राकारामार्द्रां ज्वलंतीं तृप्तां तर्पयंतीम् । पद्मे स्थितां पद्मवर्णां त्वामिहोपह्वये श्रियम् ॥ चंद्रां प्रभासां यशसा ज्वलंतीं श्रियं लोके देवजुष्टामुदाराम् । तां पद्मनेमीं शरणमहं प्रपद्ये ऽलक्ष्मीर्मे नश्यतं त्वां वृणे ॥ आदित्यवर्णे तपसो ऽधि जातो वनस्पतिस्तव वृक्षोथ बिल्व: । तस्य पलानि तपसा नुतंतु मायांतरायाश्च बाह्या अलक्ष्मी: ॥ उपैतु मां देवसख: कीर्तिश्च मणिना सह । प्रादुर्भूतो ऽस्मि राष्ट्रे ऽस्मिन कीर्तिमृद्धिं ददातु मे ॥ क्षुत्पिपासामलां ज्येष्ठा मलक्ष्मीर्नाशयाम्यहम् । आभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात् ॥ गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीग् सर्वभूतानां तामिहोपह्वये श्रियम् ॥ मनस: काममाकूतिं वाचस्सत्यमशीमहि । पशूनां रूपमन्नस्य मयि श्रीश्श्रयतां यश: ॥ कर्दमेन प्रजा भूता मयि संभव कर्दम । श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥ आप: सृजंतु स्निग्धानि चिक्लीत वस मे गृहे । नि च देवीं मातरं श्रियं वासाय मे कुले ॥ आर्द्रां पुष्करिणीं पुष्टिं पिङ्गळां पद्ममालिनीम् । चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ आर्द्रां य : करिणीं यष्टिं सुवर्णां हेममालिनीम् । सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ तां म जातवेदो लक्ष्मीमनपगामिनीम् । यस्यां हिरण्यं प्रभूतं गावो दास्यो ऽश्वान् विंदेयं पुरुषानहम् ॥

ओं महादेव्यै च विद्महे विष्णुपत्न्यै च धीमहि । तन्नो लक्ष्मी: प्रचोदयात् ॥ श्रीर् वर्चस्व मायुष्य मारोग्य मावीदात् भवमानं महीयते । धानयं धनं पशुं भहुपुत्रलाभं सतसं वत्सरं धीर्गमायु: ॥ ओं शांति: शांति: शांति: ॥

॥ इति श्रीसूक्तम् सम्पूर्णम् ॥